# B.KUMAR'S ACADEMY

## UNIT TEST-1

| | | |
|---|---|---|
| **विषय - संस्कृत** | **सुगम संस्कृतम् (चित्रपदकोष; समय, संख्या)** | **अङ्काः - ३०** |
| **वर्ग - दशमी** | **१)आद्यकृषकः पृथुवैन्यः। २) व्यसने मित्रपरिक्षा। ३) सूक्तिसुधा।** | **समयः - १ होरा** |

**प्र १ अ) चित्रं दृष्ट्वा नामानि लिखत (केवलम् ४ )** **४**



१) ________ २) ________ ३) ________ ४) ________ ५) ________

**आ) सख्यां अङ्कैः अक्षरैः लिखत । (केवलम् २)** **१**

१) ८५ २) अष्टादश ३) पञ्चात्रिंशत्

**इ) समयमेलनम् कुरूत ।** **२**

| 'अ' | | 'ब' |
|---|---|---|
| १) पादोन एकादशवादनम् | - | ७.१० |
| २) दशाधिक सप्तवादनम् | - | ७.३० |
| ३) सपाद एकादशवादम् | - | १०.४५ |
| ४) सार्ध सप्तवादनम् | - | ११.१५ |

**प्र २ गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरूत।**

तदा पृथुभूपेन तदर्थं धनुः सज्जीकृतम् । तदा भूमिः स्त्रीरूपं धृत्वा तस्य पुरतः प्रकटिता अभवत् अवदत् च, "हे राजेंन्द्र ! तव पिता दुःशासकः वेनराजः राजधर्मस्य पालनं नाकरोत् । तदा मया चोरलुण्ठकभयात् धनधान्यपुष्पफलानि मम उदरे निहितानि । त्वं तु प्रजाहितदक्षः नृपः। यदि त्वं प्रयत्नेन कृषिकार्यं करोषि तर्हि अहं प्रसन्ना भविष्यामि। अतः धनुः त्यज । खनित्राणि, हलान्, कुद्दालकान् लवित्राणि च हस्ते गृहीत्वा प्रजाजनैः सह कृषिकार्यं कुरू ।"

**१) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।** **१**

i) भूम्या धनधान्यपुष्पफलानि स्व-उदरे निहितानि यतः

अ) वेनभूपः दुःशासकः आसीत्।

ब) भूमिः स्वभावेन कृपणा आसीत् ।

**२) कः कं वदति ?** **१**

i) "त्वं तु प्रजाहितदक्षः नृपः।"

**३) पूर्ण वाक्येन उत्तरत।** **२**


i) भूमि: केन उपायेन प्रसन्ना भवति?

ii) चोरलुण्ठकभयं कदा वर्तते?

**४) सत्यं / असत्यं इति लिखत।** १

i) धनु: कृषिकार्ये न उपयुक्तम् ।

**५) पृथुवैन्यस्य आदर्शभूतानि कार्याणि लिखत।** २




**प्र ३ गद्यांशं पठित्वा निर्दिष्ठाः कृतीः कुरूता।**

मृगं तथाविधं दृष्ट्वा स उवाच, "सखे! किमेतत् ?" मृगेणोक्तम् "सुहृद्वाक्यस्य अनादरात् बध्दोऽहम् । उक्तं च -

सुहृदां हितकामानां यः शृणोति न भाषितम् ।
विपत् सन्निहिता तस्य स नरः शत्रुनन्दनः ॥"

काकः अब्रूत, "स वञ्चकः क्वास्ते?" मृगेणोत्तम्, "मन्मांसार्थी तिष्ठत्यत्रैव।" काकः उक्तवान्, "उपायस्तावत् चिन्तनीयः।"

अथ प्रभाते क्षेत्रपतिर्लगुडहस्तः आगच्छन् काकेनावलोकितः । तमालोक्य काकेनोक्तम्, "सखे मृग, त्वमात्मानं मृतवत्संदर्शन । वातेनोदरं पूरयित्वा पादान्स्तब्धीकृत्य तिष्ठ। यदाहं शब्दं करोमि तदा त्वमुत्थाय सत्वरं पलायिष्यसे।" मृगस्तथैव स्थितः।

क्षेत्रपतिना मृगः आलोकितः उकश्च, "आः! स्वयं मृतोऽसि!" सऽमृगं बन्धनात् व्यमुञ्चत् । ततः काकशब्दं श्रुत्वा मृगः सत्वरं पलियितः। तमुद्दिश्य क्षेत्रपतिना क्षिप्तेन लगुडेन शृगालस्तावद् हतः।

**१) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।** १

i) व्यसने --------मृगस्य साहाय्यम् अकरोत् (काकः / शृगालः)

ii) क्षेत्रपतिना --- उद्दिश्य लगुडः क्षिप्तः। (शृगालम् / मृगम्)

B KUMAR'S ACADEMY

**२) विशेषण - विशेष्याणि मेलनं कुरूत ।** २

| **विशेषणानि** | **विशेष्याणि** |
|---|---|
| i) सन्निहिता | शृगालः |
| ii) तथाविधम् | लगुडेन |
| iii) मांसार्थी | विपत् |
| iv) क्षिप्तेन | मृगम् |

**३) लकारं लिखत ।** १

i) त्वं सत्वरं पलायिष्यसे ।

**४) उत्तरपदं चित्वा लिखत।** १

A-1, Ground Floor, Green Park Building Shastri Nagar, near Indian Overseas Bank,
Vasai West, Vasai-Virar, Maharashtra 401202 +91 9619619937, 0250-2334511

i) क्वास्ते = क्व +-----

ii) तथैव = तथा + .........

**५) जालरेखा चित्रं पूरयत ।** २

क्षेत्रपतिना →
- मृगः ____________ ।
- मृगः ____________ इति चिन्तितम्।
- मृगः प्रति ____________ क्षिप्तः।
- शृगालः ____________ ।

**प्र ४ अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरूत**

> **'अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।**
> **तृणैर्गुणत्वमापन्नैर्बध्यान्ते मत्तदन्तिनः।।**

**१) पूर्णवाक्येन उत्तरं लिखत।** १

i) कैः मत्तदन्तिनः बध्यन्ते?

**२) चतुर्थपदं लिखत।** १

i) अल्पानां: वस्तूनाम् :: अल्पैः-----

**३) 'सहंतिः कार्यसाधिका' इति सूक्तिं स्पष्टीकुरूत।** २

**आ) श्लोकौ शुध्दौ पूर्णौ च लिखत** ४

i) आत्मनो --------- सर्वार्थसाधनम् ॥

ii) घटं--------- पुरुषे भवते ॥

**आ) योग्य रूपं लिखित्वा रिक्तस्थानपूर्ति कुरूत।** १

i) वेदा : ------ (४) सन्ति।

ii) अस्मिन् पाठे ------- (७) श्लोकाः सन्ति।

****

B.KUMAR'S ACADEMY

# B.KUMAR'S ACADEMY

## UNIT TEST-2

विषय - संस्कृत　　४)अमूल्यं कमलम् ।, ५)स एव परमाणुः ।　　अङ्काः - ३०

वर्ग - दशमी　　६) युग्ममाला, ७) संस्कृत नाट्यस्तबकः।　　समयः - १ होरा

**प्र १ गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरूत।**

> अथ प्राप्त:सुदासस्तदुद्यानं, यत्र भगवत: सुगतस्य निवास: । तत्र वटवृक्षास्याधस्तादेकस्मिन्नश्मखण्डे सपुपविष्ट आसीत्स महात्मा । अनल्पेन धाम्ना राजते स्म तस्य भगवतो वदनम् । तदालोकयत: सुदास्य चित्ते भक्तिरसार्णव उदतिष्ठत् । स हस्तस्थं नीरजं भगवत: सुगतस्य चरण्योरर्घ्यं कृत्वा 'नमो भगवते' इति वदन् सविनयं प्राणमत् ।
>
> तं प्रसादवर्षिभ्यां लोचनाभ्यां निरूपयन् स्मयमानमुखपद्मो भगवान् अभाषत, "वत्स, किमिच्छसि?" इति। एवम् उक्तवति सुगते निरिच्छ: सुदास: प्रत्यवदत्, "भगवन् किमन्यत्? केवलं भगवत: चरणकमलस्पर्शेन आत्मा मे कृतार्थतां लभताम्" इति।
>
> एवंवादिनं सुदासं 'तथास्तु' इत्यब्रवीद् भगवान सुगत: । अहो प्रभाव: सुगतस्य, यत्तस्य दर्शनमात्रेणैव कमलार्थं बहुमूल्यमपेक्षमाण: सुदासस्तद्विस्मृत्य सुगतचरणाभ्यां तत्कमलं समर्पितवान् ।
>
> एष सुगत: एव ननु भगवान् गौतमबुध्द:।

**१) पूर्ण वाक्येन उत्तरं लिखत।** २

i) सुगतस्य नयनाभ्यां किम् अवर्षत ?

ii) क: सुगत: ?

**२) क: कं वदति।** १


i) वत्स, किम् इच्छसि ?

**३) गद्यांशात आगतानि पूर्वकालवाचक ल्वे अव्ययानि लिखत।** १

**४) प्रश्ननिर्माणम् कुरूत ।** १

i) स: <u>सविनयं</u> प्राणमत् ।

**५) स्थानाधारेण शब्दपेटिका पूरयता** २



(वटवृक्ष: नगरम्, अश्मखण्ड:, उद्यानम्)

A-1, Ground Floor, Green Park Building Shastri Nagar, near Indian Overseas Bank,
Vasai West, Vasai-Virar, Maharashtra 401202 +91 9619619937, 0250-2334511

**प्र २ गद्यांश पठित्वा निर्दिष्टा : कृती: कुरूत।**

(अर्णव: जपाकुसुमं गृहीत्वा प्रविशति। तस्य पिता विज्ञानस्य प्राध्यापक:। स: पुस्तकपठने मग्न:। तस्य पार्श्वे उत्पीठिकायां सूक्ष्मेक्षिका वर्तते)

अर्णव : पिता:, अस्माकम् उद्यानाद् जपाकुसुमम् आनीतं मया। कियन्त: सूक्ष्मा तस्य परागणा:!

पिता : सूक्ष्मेक्षिकया पश्य, तेषां कणानां रचनाम् अपि द्रष्टुं शक्नोषि ! (अर्णव: तथा करोति)

अर्णव : पित:, अद्भुतम् तत् । सूक्ष्मकणेषु तस्य अङ्गानि दृश्यन्ते।

पिता : अर्णव, एतानि पुष्पस्य अङ्गानि त्वं सूक्ष्मेक्षिकया द्रष्टुं शक्नोषि।परन्तु एतद् विश्वं परमाणुभ्य: निर्मितम् ते परमाणव: तु सूक्ष्मेक्षिकया अपि न दृश्यन्ते।

अर्णव : परमाणु: नाम किम् ?

पिता : अस्तु कथयामि । मुष्टिमात्रान् तण्डुलान् महानसत: आनय ।

अर्णव : (तथेति उक्त्वा पाकगृहात् तण्डुलान् आनयति।) स्वीकरोतु, भवान् ।

पिता : अनुधा इमं तण्डुलं विभज ।

अर्णव : तात, कियान् लघु: अस्ति एष: । पश्यतु, एतस्य भागद्वयं यथाकथमपि कृतं मया ।

**१) उचितं कारणं चित्वा वाक्यं पुनर्लिखत।** १

i) पिता अर्णवाय तण्डुलान् आनेतुम् आदिशत् यत: स:----------

अ) तण्डुलानां विषये अर्णव: ज्ञातुम् ऐच्छत ।

ब) तस्मै परमाणु: नाम किं तत् स: स्पष्टीकर्तुम् ऐच्छत्।

**२) गद्यांशत् आगतानि हेत्वर्थकं तथा पूर्वकालवाचकं अव्ययं चित्वा लिखत।** १

**३) पूर्ण वाक्येन उत्तरं लिखत ।** २

i) एतद् विश्वं केभ्य : निर्मितम् ?

ii) अर्णव : कि दृष्ट्वा चकित : ?

**४) लकारं लिखत् ।** १

i) कथयामि ।

**५) माध्यमभाषया उत्तरं लिखत।** २

i) 'तण्डुलान् आनय' इति पिता अर्णवं किमर्थम् आदिष्टवान्?

**प्र ३ अ) पद्यांश पठित्वा निर्दिष्टा : कृती: कुरूत**

"उत्तमो नातिवक्ता स्यादधमो बहु भाषते।
सुवर्णे न ध्वनिस्तादृग्यादृक्कांस्ये प्रजायते।।"

**१) एक वाक्येन उत्तरत ।** १

**i) सुवर्णकांस्ययो: मध्ये कस्मिन् अधिक: ध्वनि: प्रजायते?**

**२) सन्धिविग्रह कुरूत।** १

i) उत्तमो नातिवक्ता :------+------+------

**३) माध्यमा भाषया उत्तरं लिखत।** २

i) 'उत्तमो नातिवक्ता स्यात् ' इति सत्यं सुवर्णस्य दृष्टान्तेन कथं प्रतिपादितं कविना?

**आ) श्लौकौ शुद्धौ पूर्णौ च लिखता । (केवलम् २)** ४

१) 'यत्र विव्दज्जनो ------------द्रुमायतें।

२) 'तावद् भयाध्दि ----------- यथोचितम्'।

B.KUMAR'S ACADEMY

३) ‘यथा चतुर्भि:-----------कर्मणा’।

**प्र ४ माध्यमभाषया सरलार्थ लिखत । (केवलम् ४)** ४

**१**) (तत: प्रविशति वैखानस:,अन्यौ तापसौ च)

वैखानस: -(राजनम् अवरुध्य) राजन! आश्रममृगोऽयं, न हन्तव्य:न हन्तव्य:। आशु प्रतिसंहरसायकम्। राज्ञां शस्त्रम् आर्तत्राणाय भवति न तु अनागसि प्रहर्तुम् ।

दुष्यन्त: - प्रतिसंहृत एष: सायक: । (यथोक्तं करोति)

वैखानस: - राजन् ! समिदाहरणाय प्रस्थिता वयम् । एष खलु कण्वस्य कुलपते: अनुमालिनीतीरमाश्रमो दृश्यते । प्रविश्य प्रतिगृह्यताम् आतिथेय: सत्कार:।

**२**) शक्र: - (आत्मगत्) किं नु खल्वहं वदामि ? यदि दीर्घायुर्भवेति वदेयम् दीर्घायुर्भवेत् । यदि न वदेयम् मूढ इति मां परिभवति। तस्माद् उभयं परिहृत किं नु खलु भाषे ? भवतु दृष्टम्। (प्रकाशम्) भो: कर्ण, सूर्य इव,चन्द्र इव, हिमवान् इव, सागर इव तिष्ठतु ते यश: ।

कर्ण: - भगवन् , किं नोक्तम् दीर्घायुर्भवेति ? अथवा यदुक्तं तदेव शोभनम् । यत: हतेषु देहेषु गुणा: धरन्ते ।

**प्र ५ सूचनानुसारं कृती कुरूत। (केवलम् ४)** ४

i) अधम: बहु भाषते । (लिड्लकार योजयत)

ii) त्वं सुकृतं कुरू। (‘त्व’स्थाने ‘भवान्’ योजयत।)

iii) सम्यग् उक्तं त्वया (वाच्यपरिवर्तनम् कुरूत)

iv) सुगत: अधिकतमं मूल्यं ददाति । (णिजन्तं कुरूत)

v) स:तण्डुला: आनयति। (वाक्यं शुध्दं कुरूत।)

****

B.KUMAR'S ACADEMY

# UNIT TEST-3

विषय - संस्कृत
वर्ग - दशमी

८) वाचनप्रशंसा।, ९) धनोर्व्याघ्रः पलायते।
१०) नदीसुक्तम् ।, ११) जटायुशौर्यम् ।

अङ्काः - ३०
समयः - १ होरा

**प्र १ माध्यमभाषया सरलार्थं लिखत । (केवलम् ३)** ६

१) शीलं सद्गुणसम्पत्तिः ज्ञानं विज्ञानमेव च ।
उत्साहो वर्धते येन वाचनं तद् हितावहम् ॥१॥

२) मनुजा वाचनेनैव बोधन्ते विषयान् बहून्।
दक्षा भवन्ति कार्येषु वाचनेन बहुश्रुताः ॥२॥

३) वाल्मीकिव्यासबाणाद्याः प्राचीनाः कविपण्डिताः ।
तान् शिक्षयन्ति सततं ये सदा वाचने रताः ॥३॥

४) अद्ययावध्दि ज्ञानाय वृत्तपत्रं पठेत्सदा ।
सर्वविधसुविद्यार्थं वाचनमुपकारकम् ॥४॥

**प्र २ गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरूत ।**

सर्कसस्वामिनः विवशता मया अवगता। यदृच्छया प्राप्तः अयं परोपकारस्य अवसरः इति मत्वा तस्य साहाय्यं करणीयमिति मया निश्चितम् । भल्लूकवेषे अब्दुलः शोभेत इति मत्वा सः भल्लूकपात्रे नियोजितः। व्याघ्रस्य अभिनयार्थम् अहं स्वयमेव सिध्दः। एवं पात्रयोजना निर्धारिता।

कार्यक्रमात् प्रागेव अह तथा अब्दुलः व्याघ्रभल्लूकवेषौ धृत्वा स्वपञ्जरयोः समुपस्थितौ । मम पञ्जरस्य पुरतः एव अधिकः सम्मर्दः जातः। यावच्छक्यम् अहं जनान् रञ्जयितुं प्रयत्तवान् किन्तु जना न सन्तुष्टाः । "किमयं व्याघ्रः? कृशोऽयम्" इति उपहासेन अवदन्। तदा एव एका महिला स्वपुत्रेण सह व्याघ्रं द्रष्टुम् आगता । मम गर्जनया श्रुत्वा बालः भीतः अतः सा माता मयि पाषाणखण्डान् अक्षिपत् । तदा वेदनया बाधितः अहं क्षणं यावत् व्याघ्रः न वदति इति विस्मृत्य अवदम्,

"दृष्ट्वा पञ्जरस्थितान् व्याघ्रान्, महिलाः क्षिपन्ति पाषाणखण्डान् ।" मम वाक्यसमाप्तेः पूर्वमेव व्याघ्रस्य मनुष्यवाण्या भाषणेन मूर्च्छितासा महिला 'भूतोऽयं भूत'... इति उच्चैः आक्रोशन्ती भूमौ पतिता । मम पुत्रः राघुः अपि एकवारं पञ्जरसमीपम् आगत्य, "आप्पा ! चायं पातुम् इच्छति किम्?" इति यदा पृष्टवान् तदा प्रेक्षकाः सम्भ्रान्ताः एव।

**१) पूर्ण वाक्येन उत्तरं लिखत।** २

i) जनाः किं दृष्ट्वा सम्भ्रान्ताः?

ii) चिमणरावः व्याघ्रत्वं कदा विस्मृतवान् ?

**२) कः कं वदति ।** १

A-1, Ground Floor, Green Park Building Shastri Nagar, near Indian Overseas Bank,
Vasai West, Vasai-Virar, Maharashtra 401202 +91 9619619937, 0250-2334511

i) चायं पातुम् इच्छाति किम् ?

**३) गद्यांशात् आगतानि पूर्वकालवाचक त्वान्त अव्यायानि चित्वा लिखत।** १

**४) प्रश्ननिर्माणं कुरूत।** १

i) महिला मयि पाषाणखण्डान् अक्षिपत् ।

**५) क्रमेण योजयत् ।** २

i) पात्रयोजना निर्धारिता। ii) राघो: प्रश्न:।

ii) परोपकारस्य अवसर: प्राप्त: iv) व्याघ्रवाणी श्रुत्वा मूर्च्छिता महिला।

**प्र ३ माध्यमभाषया सरलार्थ लिखत । (केवलम् १)** ४

१) विश्वामित्र: : अयि मात:, विश्वामित्रोऽहम् । दूरत: आयात: रथै: शकटै:च । वयं सर्वे परतीरं गन्तु समुत्सुका:।

नदी (शुतुद्री) : विप्रवर, मधुरा खलु ते वाणी । रञ्जयति अस्मान् । वद कथं तव साहाय्यं कर्तव्यम्?

विश्वामित्र: : अम्ब, शृणु मे अभ्यर्थनाम् ।

२) नदी (विपाट्) : किम् ? एष: मर्त्य: मां माता इति सम्बोधयति?

नदी (शुतुद्री) : कथं माता न करोति साहाय्यं स्वपुत्रस्य? साधु मानवश्रेष्ठ साधु! किन्तु, कच्चित् तव वंशजा: मनुजा: तवेदं वचनं विस्मरिष्यन्ति?

विश्वामित्र: : न हि मात:, नैतत् शक्यम् । सर्वा: सरित: सुखं वहन्तु। सर्वे जना: सुखिन: सन्तु ॥ (विश्वामित्र: निर्गच्छति।)

**प्र ४ था अ) पद्यांशं पठित्वा निदिष्टा: कृती: कुरूत।**

'ततौऽस्य सशरं चापं मुक्तामणिविभुषितम् ।
चरणाभ्यां महातेजा बभञ्ज पतगोत्तम: ॥

**१) पूर्ण वाक्येन उत्तरं लिखत।** १

१) रावणस्य चापं कीदृशम् ?

**२) उत्तरपदं लिखत ।** १

१) ततोऽस्य = तत: +------।

३) विशेषणम् विशेष्य मेलनम् कुरूत । १

| **विशेषणम्** | **विशेष्यम्** |
|---|---|
| मुक्तामणि विभूषितम | रावणेन |
| महातेजा: | चापम् |
| | जटायु: |

**४) आ) माध्यमभाषया उत्तरं लिखत।** २

१) जटायुरावणयो: संङ्घर्षस्य वर्णनं कुरूत् ।

**इ) अन्वयं पूरयत् ।** २

तत:स: ------------क्रोधात्------------अपोथयत्
-------------- --उद्धत्य पक्षौ पार्श्वौ च----------।

B.KUMAR'S ACADEMY

प्र ५ अ) व्याकरण

१) नाम-तालिका पूरयत । (केवलम् ४) २

| ए.व | व्दि.व | ब.व | विभक्तिः |
|---|---|---|---|
| वाणिजा | ________ | ________ | तृतीया |
| ________ | ________ | वाचः | व्दितीया |
| दिशि | ________ | ________ | सप्तमी |

२) सर्वनामतालिका पूरयत । (केवलम् ४) २

| ए.व | व्दि.व | ब.व | विभक्तिः |
|---|---|---|---|
| माम्-मा | ________ | ________ | तृतीया |
| ________ | ________ | एतानि | व्दितीया |
| ________ | भवन्तौ | भवन्तः | सप्तमी |

३) क्रियापद तालिकां पूरयत। २

| लकारः | ए.व | व्दि.व | बहु.व | पुरूषः |
|---|---|---|---|---|
| लट् | ________ | ________ | मन्यन्ते | प्र-पु |
| लोट् | पूजय | ________ | ________ | म.पु |
| लृट् | ________ | भविष्यावः | ________ | उ.पु |

B.KUMAR'S ACADEMY

***

B.KUMAR'S ACADEMY

# UNIT TEST-4

| | | |
|---|---|---|
| **विषय - संस्कृत** | **१२) आदिशङ्कराचार्यः।, १३) चित्रकाव्यम् ।** | **अङ्काः - ३०** |
| **वर्ग - दशमी** | **१४) प्रतिपदं संस्कृतम् ।, १५) मानवता धर्मः।** | **समयः - १ होरा** |

**प्र १ गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरूत।**

एकस्मिन् दिने शङ्करः स्नानार्थं पूर्णांनदीं गतः । यदा सः स्नाने मग्नः तदा तत्र एकः नक्रः आगतः। नक्रः झटिति तस्य पादम' अगृह्णात् तदा शङ्क उच्चैः आक्रोशत् ।'अम्ब! त्रायस्व। नक्रात् त्रायस्व!'' आक्रोशं श्रुत्वा नदीतीरं प्राप्ता आर्याम्बा पुत्रं नक्रेण गृहीतमपश्यत् ।भयाकुला सा अपि रोदनम् आरभत। शङ्करः मातरम् आर्ततया प्रार्थयत - ''अम्ब, इतःपरम् अहं न जीवामि । मरणात् पूर्वं संन्यासी भवितुम् इच्छामि। अधुना वा देहि अनुमतिम्।'' चेतसा अनिच्छन्ती अपि विवशा माता अवदत् - ''वत्स, यथा तुभ्यं रोचते तथैव भवतु। इदानीमेव संन्यासं स्वीकुरू । मम अनुमतिः अस्ति'' इति। तत्क्षणमेव आश्चर्यं घटितम् ।दैववशात् शङ्करः नक्राद् मुक्तः । स नदीतीरम् आगत्य मातुः चरणौ प्राणमत् ।

अनन्तरं शङ्करः मातरं संन्यासस्य महत्त्वम् अवाबोधयत् । संन्यासी न केवलम् एकस्याः पुत्रः। विशालं जगद् एव तस्य गृहम् । 'मातः, यदा त्वं स्मरिष्यसि तदा एव त्वत्समीपमागमिष्यामि' इति मात्रे प्रतिश्रुत्य सः गृहात् निरगच्छत् ।ततः गोविन्दभगवत्पादानां शिष्यो भूत्वा सः सर्वाणि दर्शनानि अपठत्। तेभ्यः संन्यासदीक्षां गृहीत्वा वैदिकधर्मस्य स्थापनार्थं प्रस्थानम् अकरोत् ।

**१) पूर्ण वाक्येन उत्तरं लिखित ।** २

१) शंकरः कस्य शिष्य अभवत् ?

२) शंकर : किमर्थम आक्रोशत् ?

**२) प्रश्ननिर्माणम् कुरूत।** १

१. नक्रात् मुक्त : शंकरः मातुः चरणौ प्राणमत् ।


**३) सन्धिविग्रहं कुरूत ।** १

१) गृहीतमपश्यत्

**४) लकारं लिखत।** १

१) अनुमतिं देहि ।

**५ जालरेखाचित्रं पूरयत।** २




A-1, Ground Floor, Green Park Building Shastri Nagar, near Indian Overseas Bank, Vasai West, Vasai-Virar, Maharashtra 401202 +91 9619619937, 0250-2334511

**प्र २ अ) पद्यांशं पठित्वा निर्दिष्टः कृतीः कुरूत।**


| |
|---|
| वैद्यराज नमस्तुभ्यं यमराजसहोदर।<br>यमस्तु हरति प्राणान् त्वं तु प्राणान् धनानि च । |

**१) पूर्ण वाक्येन उत्तरं लिखत ।** २

i) वैद्यराजः कस्य सहोदरः?

ii) वैद्यराजयमराजयोः किं साधर्म्यम् ?

**२) जालरेखाचित्रं पूरयत** २




**आ) श्लोकौ शुद्धौ पूर्णौ च लिखत । (केवलम् १)** ४

| |
|---|
| १) (रे रे चातक---------वचः ॥१॥<br>२) (अयं न भक्तो----------निर्धनो वा) |

**प्र ३ गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरूत।**

प्रसादः- (अग्रे आगत्य) नमसते । अहं रसायनशास्त्रस्य छात्रः। प्राचीनभारतीयरसायनशास्त्रम् इति मम संशोधनक्षेत्रम् । तव्दिषयकाः ग्रन्थाः संस्कृतभाषया लिखिताः। शालायां यद् संस्कृताध्ययनं कृतं तस्य उपयुक्तताम् अहम् अधुना अवगच्छामि ।

लीना - अहमपि भाषाशास्त्रम् अधीत्य बेङ्गलुरू इत्यत्र सॉफ्टवेअर-क्षेत्रे भारतीयभाषाविश्लेषिकारूपेण कार्यं करोमि। संस्कृतस्य ज्ञानम् आधुनिकभारतीय-भाषाणां विश्लेषणे अतीव साहाय्यकरं भवति इंति मे अनुभवः।

तनुजा -पार्श्वनिवेदनम् इति मे व्यवसायः । संस्कृतश्लोकादीनां पठनेन श्ब्दोच्चारणस्य उत्तमः अभ्यासः भवति। तेन अभिनये निवेदने च प्रभावः वर्धते ।साम्प्रतं कलाक्षेत्रे कार्यरताः अस्मासु केचन भरतमुनेः नाट्यशास्त्रस्य अध्ययनं कुर्वन्ति ।

समीर - भोः, भारतीयविद्यायाः नाम भरतीयतत्त्वज्ञान-योगशास्त्र-इतिहास - स्थापत्यादिशास्त्राणाम् अध्ययनाय विदेशेष्वपि जैके जनाः उत्सुकाः । तदर्थं काश्चन दूरचित्रवाहिन्यः अपि सन्ति । तत्र संस्कृततज्ज्ञानाम् आवश्यकता वर्तते । मम सुहृद् आशयसम्पादकरूपेण तत्र कार्यरतः।

महोदया - अस्माभिः संस्कृतस्य अध्ययनं शालायां कृतम् । परं तस्य अनेन प्रकारेण उपयोजनं भवेदिति अस्माभिः नैवचिन्तितम् ।

महोदय - सत्यमेव ।

लीना - यस्मिन् कस्मिन्नपि क्षेत्रे वयं वृत्त्यर्थं कार्यरताः स्याम, तत्र संस्कृतज्ञानम् अस्मत्कृते विशेषार्हता भवति।

**१) पूर्ण वाक्येन उत्तरत ।** २

B.KUMAR'S ACADEMY

i) तनुजाया: व्यवसाय: क: ?

ii) प्रसादस्य संशोधन क्षेत्रं किम् ?

**२) सत्यं / असत्यं इति लिखत ।** १

i) संस्कृत भाषाया: अध्ययनं न केवल भारते अपि तु विदेशेषु प्रचलितम् ।

**३) प्रश्ननिर्माणम् कुरूत ।** १

i) समीर: परिषदि निमन्त्रित: ।

**४) सन्धिकुरूत ।** १

i) इति+एतानि =---------।

ii) नम: + ते = ------------।

**५) माध्यभाषया उत्तरं लिखत ।** २

i) संस्कृताध्ययनम् अन्यक्षेत्रेषु कथम् उपयुक्तम् ?

**प्र ४ अ) माध्यमभाषया सरलार्थं लिखत । (केवलम् २)** ४

१) (यथैव सकला नद्य प्रविशन्ति महोदधिम् ।
तथा मानवताधर्मं सर्वे धर्मा: समाश्रिता:।)

२) (षड्जमूला तथा सर्वे सङ्गीते विविधा स्वरा: ।
तथा मानवताधर्मं सर्वे धर्मा: समश्रिता:।)

३) (एकीभूय तथा सर्वे वर्णा गच्छन्ति शुक्लताम्।
तथा सम्भूय शंसन्ति धर्मा मानवतागुणम् ।)

**आ) माध्यमभाषया उत्तरं लिखत।**

**१)** नदीनां, स्वरांणां वर्णानां च उदाहरणै: मानवता धर्मस्य महत्त्वं स्पष्टीकुरूत। २

**इ) समासतालिका पूरयत ।** २

| समस्तपदम् | विग्रह | समासनाम |
|---|---|---|
| प्रतीक्षालय: | ________ | चतुर्थी-तत्पुरूष |
| ________ | निद्रायां मग्न: | सप्तमी-तत्पुरूष |

***

B.KUMAR'S ACADEMY